षोडशः पाठः

# अहो ! दैवगतिश्चित्रा

**संस्कृतसाहित्ये दण्डिनः पदलालित्यम् इति कथनम् अतीव प्रसिद्धम् । तस्य महाकवेः दशकुमारचरितकाव्यस्य संस्कृतगद्यकाव्येषु महत्त्वपूर्णं स्थानमस्ति । पूर्वोत्तरपीठिकयोः विभक्तमिदं काव्यम् । प्रस्तुतोऽयं कथात्मकः पाठः दशकुमारचरितस्य पूर्वपीठिकायाः प्रथमोच्छ्वासात् सङ्कलितः अस्ति । राज्ञः हंसवाहनस्य मंत्री आसीत् रत्नोद्भवः । तस्य वृत्तम् अत्र प्रदत्तमस्ति । प्रतिक्षणं विषमपरिस्थितौ अपि तत्पुत्रः राज्ञः समीपं सम्प्राप्तः । एतत् सर्वं पठित्वा प्रतीयते यद् वस्तुतः दैवगतिश्चित्रा भवति ।**

कदाचिद्वामदेवशिष्यः सोमदेवशर्मा नाम कञ्चिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत – 'देव ! रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि–'स्थविरे ! का त्वम् ? एतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसि' इति ।

वृद्धयाप्यभाषि – 'मुनिवर ! कालयवननाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति । तन्नन्दिनीं नयनानन्दकारिणीं सुवृत्तां नामैतस्माद्द्वीपादागतो मगधनाथमन्त्रिसम्भवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रान्तभूवलयो मनोहारी व्यवहार्युपयम्य सुवस्तुसम्पदा श्वशुरेण सम्मानितोऽभूत् । ततः सोदरविलोकनकौतूहलेन रत्नोद्भवः कथंचिच्छ्वशुरमनुनीय चपललोचनया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे । कल्लोलमालिकाभिहतः पोतः समुद्राम्भस्यमज्जत् । गर्भभरालसां तां ललनां धात्रीभावेन कल्पिताहं कराभ्यामुद्वहन्ती फलकमेकमधिरुह्य दैवगत्या तीरभूमिमगमम् । सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि । क्लेशस्य परां काष्ठामधिगता सुवृत्तास्मिन्नटवीमध्येऽद्य सुतमसूत । प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति । विजने जने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽप्यनायि' इति ।

तस्मिन्नेव क्षणे वन्यो वारणः, कश्चिददृश्यत । तं विलोक्य भीता सा बालकं निपात्य प्राद्रवत् । अहं समीपलतागुल्मके प्रविश्य परीक्ष्यमाणोऽतिष्ठम्, निपतितं बालकं पल्लवकवलमिवाददति गजपतौ कण्ठीरवो महाग्रहेण न्यपतत् । भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपतत् ।

'चिरायुष्मत्तया स चोन्नततरुशाखासमासीनेन वानरेण केनचित्पक्वफलबुद्ध्या परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्तोऽभूत् । सोऽपि मर्कटः क्वचिदगात् । बालकेन सत्त्वसम्पन्नतया सकलक्लेशसहेनाभावि । केसरिणा करिणं निहत्य कुत्रचिदगामि । लतागृहान्निर्गतोऽहमपि तेजः पुञ्जं बालकं शनैरवनीरुहादवतार्य वनान्तरे वनितामन्विष्य अविलोक्यैनमानीय गुरवे निवेद्य तन्निदेशेन भवन्निकटम् आनीतवानस्मि' इति ।

सर्वेषां सुहृदामेकदैवानुकूलदैवाभावेन महदाश्चर्यं बिभ्राणो राजा 'रत्नोद्भवः कथमभवत्' इति चिन्तयंस्तन्नन्दनं पुष्पोद्भवनामधेयं विधाय तदुदन्तं व्याख्याय सुश्रुताय विषादसन्तोषावनुभवन् तत् अनुजतनयं समर्पितवान् ।

## शब्दार्थः

निक्षिप्य - संस्थाप्य (स्थापित करके)। स्नात्वा - स्नानं कृत्वा। विलोक्य - दृष्ट्वा। अभाणि - अकथयत्। प्रवहणम् - नौकाम्। आरुह्य - आरुढो भूत्वा (बैठकर)। काननावनौ - अरण्यप्रदेशे। अटवीमध्ये - अरण्यमध्ये। उद्वहन्ती - धारयन्ती। आयासेन - क्लेशेन। रमणीयानाम् - उत्कृष्टानाम्। व्यवहारी - वाणिज्यकर्ता। उपयम्य - विवाह्य (विवाह करके)। कल्लोलानाम् - महातरङ्गाणाम्। मालिकया - परम्परया। अभिहतः - ताडितः। अमज्जत्-निमग्नः (डूबना)। आलसाम् - जड़ीकृताम्। ललनाम् - स्त्रियम्। फलकम् - काष्ठखण्डम्। परिवृतः - परिवेष्टितः (घिरी हुई)। असूत - प्रसूतवती (उत्पन्न किया)। विचेतना - संज्ञारहिता। प्रच्छायेन - प्रचुरच्छायया (सघन छाया)। विवशायाः - परवशायाः। वारणो - गजः। प्राद्रवत् - अपलायत् (भाग गई)। समीपलतागुल्मके - समीपस्थलतागृहे। पल्लवकवलम् - किसलयग्रासम्। कण्ठीरवः - सिंहः। भीमो - भयङ्करो। अधिकावेशेन - अधिकक्रोधेन। वियति - आकाशे। समुत्पात्यमानः - समुत्क्षिप्यमाणः। चिरायुष्मत्तया - दीर्घजीविततया। समासीनेन - उपविष्टेन (बैठने से)। मर्कटः - वानरः। सत्त्वसम्पन्नतया - बलशालितया। अवनीरुहाद् - वृक्षात्। बिभ्राणो - धारयन् (धारण करता हुआ)। तदुदन्तम्-पूर्वोक्तं वृत्तान्तम्।

## अभ्यासः

**1. एकपदेन उत्तरत -**

(क) सोमदेवस्य गुरुः कः ?

(ख) सोमदेवः बालकं कस्मिन् प्रदेशे अवलोकयत् ?

(ग) द्वीपस्य नाम किमस्ति ?

(घ) रत्नोद्भवः कः ?

(ङ) सोमदेवशर्मा कुत्र स्नात्वा प्रत्यागच्छत्?

**2. एकवाक्येन उत्तरत -**

(क) व्यापारकार्ये कः अतिकुशलः आसीत् ?

(ख) सोमदेवः कुत्र स्थित्वा सम्पूर्णघटनाक्रमम् अपश्यत् ?

(ग) वारणस्योपरि कः आक्रमणमकरोत् ?

(घ) बालकस्य परिग्रहणं कः अकरोत् ?

(ङ) सोमदेवः स्नानार्थं कुत्र गतः ?

**3. रिक्तस्थानानि पूरयत -**

(क) एतस्मिन् ................................ किमर्थम् आयासेन भ्रमसि ?

(ख) ................................ द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवर: अस्ति।

(ग) वन्यो वारण: ................................ अदृश्यत।

(घ) रत्नोद्भव: ................................ सह परिणयम् अकरोत्।

(ङ) चपललोचनया सह .................... आरुह्य .................... अभिप्रतस्थे।

**4. युग्ममेलनं कुरुत -**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | कालगुप्त: | सुवृत्ता |
| (ख) | मर्कट: | बालकम् |
| (ग) | तेज:पुञ्जम् | वैश्य: |
| (घ) | नयनाभिरामा | वानर: |

**5. अधोलिखितपदानां मूलशब्दं विभक्तिं वचनञ्च लिखत -**

| पदम् | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|
| रामतीर्थे | | | |
| मया | | | |
| ताम् | | | |
| शाखायाम् | | | |
| राजा | | | |

**6. अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| अभाषत | | | | |
| निवसति | | | | |
| अभवत् | | | | |
| द्रक्ष्यामि | | | | |
| न्यपतत् | | | | |

**7. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -**

(क) दैवाभावेन

(ख) तन्नन्दनम्

(ग) कथंचिच्छ्वशुर:

(घ) मध्येऽद्य

(ङ) वृद्धयाप्यभाषि

**8. अधोलिखितपदानां विलोमपदं लिखत -**

(क) स्थविर:

(ख) तत्

(ग) निमग्न:

(घ) चपलम्

(ङ) विचेतना

**9. अधोलिखितपदानां समानार्थिपदं लिखत -**

(क) झटिति

(ख) वियति

(ग) कण्ठीरव:

(घ) अटवीम्

(ङ) आयासेन

**10. अधोलिखितानां विशेषणपदानां समुचितै: विशेष्यपदै: सह मेलनं कुरुत -**

**विशेषणपदानि**

उज्ज्वलाकारम्
नयनानन्दकारिणीम्
गर्भभरालसाम्
धनाढ्य:
वन्य:

**विशेष्यपदानि**

वैश्यवर:
सुवृत्ताम्
ललनाम्
वारण:
बालकम्

**योग्यताविस्तार: -**

- दशकुमारचरिते वर्णिता: अन्या: कथा: पठनीया:।
- सन्धे: भेदोपभेदान् पठत।
- अहो ! दैवगतिश्चित्रा इति कथाया: सारं स्वशब्देषु लिखत।